International Journal of Sanskrit Research 2022; 8(2): 284-288

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 284-288
© 2022 IJSR
www.anantaajournal.com
Received: 24-10-2021
Accepted: 27-12-2021

जगन्नाथशर्मा
उपप्राध्यापक, व्याकरणविभाग,
महेशसंस्कृतगुरुकुलविद्यापीठम्,
देवघट्ट, तनहु, नेपाल

Corresponding Author:
जगन्नाथशर्मा
उपप्राध्यापक, व्याकरणविभाग,
महेशसंस्कृतगुरुकुलविद्यापीठम्,
देवघट्ट, तनहु, नेपाल

# दीक्षितीयमङ्गलस्य गभीरता

जगन्नाथशर्मा

**प्रस्तावना**

महर्षिः पाणिनिः स्वकालिकानां कुशाग्रमनीषिणां जिज्ञासूनादाय लौकिकवैदिकानामुभयविधशब्दानां निर्वचनमकार्षीत् सूत्रमाध्यमेन। येन तत्समयसापेक्षं सत्सु नवविधेषु व्याकरणेषु पाणिनिमुनिप्रणीतमेव व्याकरणं श्रेष्ठम्, सास्वतमयमिति जेगीयते स्म। तथापि कालक्रमेऽतिवाहिते कलियुगे साधनस्य प्रयोगस्य चाऽभावेन मनुष्यस्य स्मृतिशक्तिह्रासात् तदुत्तरोत्तरकालिकानां सुकुमारमतीनां सूत्रात्मकं तदेव ज्ञानं दुष्करमेव सञ्जातम्। सूत्राणां सर्वत्र विकीर्णत्वात् अष्टाध्यायीक्रमेण एकैकशब्दव्युत्पादनार्थमपि समग्राऽष्टाऽध्याय्याः पर्यालोचनं करणीयमिति महत्तत्र गौरवम्। अत एव युगानुसारमेव ज्ञानमत्यावश्यकमिति विचिन्त्य चतुर्दशशताब्दीयो रामचन्द्राचार्योऽष्टाध्यायीसूत्रपाठमुल्लङ्घ्य पाठसौकर्याय प्रक्रियाकौमुदीनाम्ना सूत्रव्याख्यानमकरोत्। एतदपि पूर्वं वामनजयादित्याभ्यां रचितो वृत्तिग्रन्थः काशिकावृत्तिरिति नाम्ना प्रसिद्ध आसीत्। ततोऽप्यग्रे शर्मवर्मप्रभृतिभिः प्रणीतं लघुव्याकरणञ्चासीत्। रामचन्द्राचार्योऽनन्तरं तस्य पुत्रो विठ्ठलः प्रक्रियाकौमुद्या एव प्रसादव्याख्यामदधात्। तथैव धर्मकीर्तिविरचितो रूपावतारः, विमलेन्द्रसरस्वतीकृता रूपमाला च आस्ताम्। भट्टोजिदीक्षितस्य गुरुः शेषश्रीकृष्णोऽपि प्रक्रियाग्रन्थस्यैव प्रकाशव्याख्यामरचयत्। इत्थं पाणिनिप्रणीताया अष्टाध्याय्याः अधिसूत्रं बहवो विपश्चिदः स्वस्वप्रतिभानेन सूत्रवृत्तिं तद्व्याख्यानाऽनुव्याख्यानञ्च प्रकटयामासुः। तेषु अन्यतमोऽयं विशिष्टविद्वान् श्रीमद्भट्टोजिदीक्षितः तत्सकलग्रन्थातिशायिनीं सिद्धान्तकौमुदीं रचयाञ्चकार। येन तत्पूर्ववर्तिनः प्रायः सर्वेऽपि ग्रन्थाः नाममात्राऽवशेषिताः। यस्य सिद्धान्तकौमुद्याश्रयणेन बहवः श्रेष्ठवैयाकरणा अभूवन्। उच्यते च प्राज्ञैरपि–

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः।। [1] इति।

तस्यामेव कौमुद्यामादौ श्रीमद्भट्टोजिदीक्षितेन कृतं यन्मङ्गलं तत्रैव यथामति विचारो विधीयते।

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।। [2]

इति हि तस्य मङ्गलम्। अत्र श्लोके बहवो विषयाः वर्तन्ते। तद्यथा–मङ्गलेति कर्तव्यतानिरूपणम्, सिद्धान्तकौमुदीति संज्ञाया अन्वर्थतो निरूपणम्, मुनित्रयमित्यत्र समासविचारः, द्वितीयोपपादनम्, तदुक्तीरित्यत्र तत्पदार्थविवरणम्, परिभाव्यशब्दार्थवर्णनम्, विरच्यते इत्यस्य विवरणम्, विषयप्रयोजनसम्बन्धाधिकारिज्ञापनञ्चेत्यादयः। अत्र दीक्षिताः यदभिप्रयन्ति तत्तु पूर्णरूपेण धीमन्त एव जानीयुरहञ्च शास्त्रं प्रविविक्षूणां छात्राणां बुद्धिवैशद्यार्थं यथामति गुरूमुखात् श्रुतं विमृशामि। प्रस्तुतप्रसङ्गे गुणदोषौ चाऽपरिहार्यावेव, तथापि दोषाणां ज्ञानमपि सिद्धान्तज्ञानायोपकारकं भवतीति हेतुमङ्गीकृत्य "शाणेन तीक्ष्णतां याति शस्त्रं शास्त्रञ्च चर्चया" इति प्राज्ञाज्ञां पालयामि।

अनेनैव लेखेन शिष्यवत्सलस्य श्रीपुरूषोत्तमत्रिपाठिगुरो: कारुण्यं ज्ञापयामि। एतस्मिन् यज्ञकर्मणि याश्च त्रुटयो भवेयुस्ता: सर्वा: क्षमासारा: विद्वांसो मर्षयित्वाऽस्मान् यथायथं प्रोत्साहयन्त्विति सप्रश्रयं निवेदयामि च। प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं यदुपर्युक्तं मङ्गलमभिहितं तद्ग्रन्थे एव निबध्नाति दीक्षित:। विचिकित्साऽत्र समुदेति तन्मङ्गलं मौनेनैव मनसि विधीयतां कुतस्तत् स्वनिर्मितं मङ्गलमपि ग्रन्थावयवीकरोति स:? तत्रोत्तरमुनिना वृद्धिसूत्रस्थमहाभाष्यं प्रमाणत्वेनाऽचार्य बालमनोमाकारो लिखति- मङ्गलादीनि मङ्गमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरूषाणि भवन्ति, आयुष्मत्पुरुषाणि अध्येतारश्च वृद्धियुक्ता: यथा स्युरिति [3]। न्याय्यमेव निर्विघ्नग्रन्थसमात्यर्थं मङ्गलमिदम्। यतोहि मङ्गलं निर्विघ्नपरिसमाप्तिकामनया क्रियते। लोकेऽपि यदिच्छया यत्क्रियते तत्तस्य साधनं दृश्यते। यथा च भोजनेच्छया कृत: पाको भोजनस्य साधनं भवति। क्षुन्निवृत्तिकामनया क्रियमाणं भोजनं क्षुन्निवृत्तिकारणं भवति।अन्यथा तदिच्छया तन्न क्रियेत। अत एव ग्रन्थस्य निर्विघ्नसमाप्तिकामनयाऽऽचरितं मङ्गलं ग्रन्थस्य परिसमाप्तये कारणं भवति। अन्यथा ग्रन्थस्य परिसमाप्तिकामयमानेन पुरुषेण ग्रन्थादौ मङ्गलं न कुर्यादिति युक्तिरत्र राजते। तस्मात् 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन:[4]' इति गीताप्रमाणेन "शिष्या: अपि ममेव ग्रन्थादौ मङ्गलमाचरेयु:" इति धिया दीक्षितेनापि तथा ग्रथित:। महावैयाकरणो नागेशोऽपि शेखरे एतदेव मङ्गलस्य फलं प्रोवाच- ग्रन्थसमाप्तिग्रन्थप्रचारादिप्रतिबन्धकदुरितप्रशमाय समुचितम् ऋषित्रयनमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नातीति [5]। अत एवाप्ता: समाप्तिकामो मङ्गलमाचरेदिति शिष्टानुमितश्रुतिरस्तीति वदन्ति। अत्रैव प्रमाणत्वं यच्छन् लक्ष्मीटीकाकारोऽपि लिति-मङ्गलञ्चात्र निर्विघ्नसमाप्तिप्रयोजकं वाक्यविशेषरूपमस्तीति [5]। नैयायिकानां मतेऽपि मङ्गलविषये निम्नचर्चा दृश्यते-

## नैयायिकरीत्या मङ्गलविचार:-

मङ्गलविषये तार्किकानां राद्धान्ते मुक्तावल्यां मतद्वयं दृश्यत [6]। तत्र प्राच्यनव्यनैयायिका: परस्परं विवदन्ते। प्राचीना वदन्ति- मङ्गलस्य फलं ग्रन्थसमाप्तिरस्ति। तत्र मध्ये तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वेन विघ्नध्वंसस्तस्या: द्वारभूतो भवतीति। नव्यसिद्धान्ते तु समाप्तिर्मङ्गलस्य परम्परयाऽपि फलं न भवति। किन्तु विघ्नध्वंस एव मङ्गलस्य फलम्। तर्हि तन्मते समाप्ति: कथं जायते? इति प्रश्ने बुद्धिप्रतिभादिकारणवशात् सा सम्पद्यते। अर्थात् समाप्तिस्तु विघ्ने हते सति (विघ्नानां ध्वंसे सति) यदि प्रतिभादिकारणकलापा: सन्ति, तर्हि ग्रन्थसमाप्तिप्रतिबन्धकपापरूपविघ्नविरहादनायासेनैव सिध्यतीति नविनानामाशय:। भवतु नाम उभयोस्तत्र विवादस्तथापि मङ्गलमनुसृतं नवेति तैरिति तु सन्देहो नैव। अर्थात् तयोर्द्वयोर्मतेऽपि समाप्तिकामो मङ्गलमाचरेत्,विघ्नध्वंसकामो वा मङ्गलमाचरेदिति रीत्या पूर्वोक्तशिष्टाचारानुमितश्रुतिस्तु स्वीकृतैव निश्चीयते। तथा सति निगूढप्रश्नो जरीजागर्ति छात्राणामत्र- शिष्टाचारानुमित: सत्यवक्ता पूर्वोक्तो वेदो मङ्गलस्य समाप्तिकारणत्वं विघ्नध्वंसजनकत्वं वा बोधयति। यत्र तु विघ्ना एव न सन्ति,तत्र तेन मङ्गलेन विघ्नध्वंसो नाऽजायत। तदाऽसत्यवक्तरि तस्मिन् वेदे कथं प्रामाण्यापत्ति: सुलभा? समाधानमत्रेदं ज्ञेयम्-सन्देहस्यास्तित्वेन निश्चयं विनापि लोकै: तन्निवारणोपाया अनुष्ठिता दृश्यन्ते। महाभाष्यमप्यत्र प्रमाणम्-"न हि भिक्षुका: सन्तीति स्थाल्यो नाधिश्रीयन्ते। न च मृगा: सन्तीति यवा नोप्यन्ते"।इति। अर्थात् विघ्ना न सन्तीति मङ्गलानि न कर्तव्यानीति कदापि समुचितो न हि भवतीति अनेन भाष्येण ज्ञायते। अतो वेदाज्ञा पालनीयेति अस्माकं कर्तव्यम्। यतो हि विघ्नाऽभाववत्यपि लेके मयि विघ्न: स्याद् वा? अहं विघ्नवान् स्यां वा? इत्याशङ्कावशाद् मङ्गलमनुष्ठीयते चेत् को दोषस्तत्रेति भाष्याक्षेपो तेषु शङ्कालुषु आपतति। अपरञ्च समाधानमिदमस्ति- सर्वमपि मङ्गलं विघ्ननाशकमिति वेदो न बोधयति। येन विघ्नविरहस्थले कृतस्य मङ्गलस्य विघ्नध्वंसाऽजनकत्वात् तस्य विघ्नध्वंसजनकतया बोधयन् वेदोऽप्रामाणिक: स्यात्। कथमिति चेत् विघ्नध्वंसजनकत्वाभाववति मङ्गले विघ्नध्वंसजनकत्वजनकत्वबोधकोऽयम्। किन्तु वेदस्त्विदं ज्ञापयति- सति विघ्ने मङ्गलं विघ्ननाशकमिति। अर्थात् विघ्ने सति क्रियमाणं मङ्गलं विघ्ननाशं प्रति कारणमिति बोधयति वेद:। यत्र तु सिद्धविघ्नविरहस्तत्र स्वतस्सिद्धो विघ्ननाशो वर्तते। स्वतसिद्धविघ्ननाशस्थलीयस्य मङ्गलस्य विघ्ननाशकत्वं न वेदेन बोध्यते।अपि तु सति विघ्ने क्रियमाणं मङ्गलमेव विघ्ननाशकं भवतीति वेदेन बोधितमत: स्वतस्सिद्धविघ्नविरहस्थलीयस्य मङ्गलस्य विघ्ननाशं प्रति कारणत्वमेवाऽनङ्गीकारात् कार्याभावेऽपि व्यभिचाराभावेन न क्षति।

## त्रैविध्यम्मङ्गलस्य-

तच्च मङ्गलं त्रिविधमस्ति- आशीर्वादात्मकम्,नमस्कारात्मकम्,वस्तुनिर्देशात्मकञ्च। कायिकं वाचिकं मानसिकमपि मङ्गलं शिष्टपरम्परायान्तु क्वचिद् दृश्यते। कायिकं मङ्गलमपि द्विविधम्- यत्किञ्चिदङ्गपूर्वकम्, सर्वाङ्गपूर्वकञ्च। यत्र ईश्वरात् गुरोर्वा स्वस्य स्वशिष्यस्य च कृते अभीष्टार्थप्रार्थनं क्रियते तन्मङ्गलमाशीर्वादात्मकं भवति। तत्रेच्छाया: स्वरूपन्तु-इदम्मे भूयादित्यादि ज्ञेयम्। तस्य च दृष्टान्तम्

"चूडामणीकृतविधुर्वलयीकृत वासुकि:
भवो भवतु भव्याय लीलाताण्डवपण्डित:" [7]।।

इत्यादि वर्तते। वस्तुनिर्देशात्मकं मङ्गलञ्च तत् स्वीक्रियते यत्र प्रतिपादनीयं वस्तु निर्दिश्य तस्य गुणगणानुवर्णनं भवति। यथा अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज: [8] इत्यादौ। तत्र ग्रन्थे कालिदासेन कुमारस्य सम्भवो वर्णनीयोऽस्ति, तदर्थं पूर्वं तस्य पितरौ काविति पार्वतीशिवयोर्वर्णनं करोति। तत्रापीयं पार्वती कस्य पुत्रीति जिज्ञासायां यस्या: पितुर्नाम हिमालयोऽस्तीति कृत्वा सर्वप्रथमं तस्य निर्दिश्यस्य वस्तुनो गुणगणानुवर्णनं करोतीति हिमालयो वस्तु निर्दिश्यते अनया रीत्याऽतो मंगलाचरणमिदं वस्तुनिर्देशात्मकं सञ्जातम्। नमस्कारात्मकं मङ्गलं "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ" एवम् "मुनित्रयं नमस्कृत्य तदुक्ती: परिभाव्य च" इत्यादि ग्राह्यम्। यत्र नमस्कर्तरि स्वनिष्ठाऽपकृष्टत्वप्रकारकबोधप्रकारकबोधानुकूलो व्यापारो दृश्यते, करबद्धशिरसंयोगानुकूलो व्यापारोऽनुभूयते वा तन्मङ्गलं नमस्कारात्मकं भवति। स्वपदेनाऽत्र नमस्कर्ता ग्राह्य:। यमुद्दिश्य नमस्कारो विधीयते स नमस्यो भवति। दीक्षितोऽत्र नमस्कर्ता, स जानाति त्रिमुन्यपेक्षयाऽहमपकृष्टोऽस्मि। मदपेक्षया ते उत्कृष्टा: सन्तीति नमांसि तेषां सन्त्विति तेभ्य: प्रणतितती: समर्पयतीति समुचितमेव वृत्तम्।

वाक्यार्थार्थज्ञाने पदार्थज्ञानं कारणं भवतीति रामगीतोक्त्या मङ्गलस्य प्रथमं पदं तत्रादौ विचार्यते।

मुनित्रयघटकस्य मुनिपदस्य विवेचनम्:- मुनिशब्दः मन्धातुत:सिद्ध्यति। तथाहि-सर्वधातुभ्य इन् इत्यत इन् इति, इगुपधात् कित इत्यत किदिति चानुवर्त्य- मनोरूच्चोपधाया: [9] इत्युणादिसूत्रेण मन्धातो: कर्तरि इन्प्रत्यये उपधाभूतस्य अकारस्य उकारादेशे मुनिरिति सम्पद्यते। गुणस्तु नेह भवति, किदिति अनुवर्तनात् तपरकरणाद् वा। इत्थं प्रकृतिप्रत्ययविभागपूर्वकतत्तदर्थकल्पनेन- मन्यते वेदशास्त्रार्थतत्वमवगच्छतीति मुनिर्भवति। बृहदारण्यके तु "तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनुषङ्गेन" तमेव विदित्वा मुनिर्भवतीति लिखितम् [10]।

त्रयमिति पदस्य प्रक्रियानिरूपणम्-

त्रयोऽवयवा अस्य समुदायस्य (अवयविन:) इति त्रयम्=त्रिसंख्यकावयवघटितसमुदाय:।अत्र अवयवाऽर्थे विद्यमानात् संख्यावाचकात् प्रातिपदिकात् अवयविन्यर्थे तयप् इत्यर्थकेन "संख्याया अवयवे तयप्" [11] इति सूत्रेण त्रिशब्दात् तयप्प्रत्यये तस्य स्थाने "द्वित्रिभ्यां तयस्याऽयज्वा" [12] इति सूत्रेण अयजादेशे स्थानिवद्भावेन तयबन्तं स्वीकृत्य तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां स्वादिसंस्कार:। यद्यप्यत्र मुनिशब्दस्य त्रिशब्दस्य चाभेदान्वये अर्थात् मुन्यभिन्नो यस्त्र्यवयव: तद्घटितमुनित्रयपदार्थस्वीकृते सति त्रिशब्दस्य मुनिशब्दसापेक्षत्वेनाऽसामर्थ्यात् अयच: स्थानिन: तयपोऽनुपपत्तिरेव। यतो हि "समर्थ पदविधि:" [13] इति सूत्रस्याऽधिकारस्तत्र तद्धिप्रकरणे प्रसरति। अतो यत्र सामर्थ्यं तत्रैव तद्धितप्रत्ययो भवति। सामर्थ्यञ्च द्विविधम्- एकार्थीभावो व्यपेक्षारूपञ्च। तत्र भिन्नभिन्नार्थोपस्थापकानां पदानामेकार्थोपस्थितिविषयकबोधजनकत्वमेकार्थीभावत्वं राजपुरूषादिवृत्तौ भवत्येतत्। स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशाद्य: परपस्परान्वय: तद् व्यपेक्षाभिधं सामथ्य [14] ँ भवति। राज्ञ:पुरूष:, त्रयोऽवयवा यस्येति विग्रहवाक्ये तद्भवति। अत्र व्यपेक्षालक्षणे लक्षणघटकत्वेन परस्परमन्वय:,इति पदं प्रविष्टं वर्तते। तस्याऽयं भाव:- ययोरर्थयो: परस्परं सम्वन्ध:, तद्वाचकयो: पदयो: परस्परं सामर्थ्यं भवति। विशिष्टाऽपेक्षा व्यपेक्षा इति व्युत्पत्ते:, ययोस्तु परस्परमसम्बन्धस्तद्वाचकयो: पदयोरपि परस्परमसामर्थ्यमेव। प्रकृतप्रसङ्गे त्रिशब्दात् समुदायेऽर्थे तयप्प्रत्यय: करणीयोऽस्ति।अत: समुदायाऽर्थे तयपि करणीये तयबर्थे समुदाये एव त्र्यवयवस्य स्वघटितत्वसम्बन्धेन यद्यन्वयस्तर्ह्येव त्रिशब्दे सामर्थ्यमागच्छति। येन समर्थभूतात्तस्मात् त्रिशब्दात् तयप्प्रत्यय (तद्धितवृत्ति:) नियमतया सिद्धयति। अत्र पूर्वं मुनिशब्दस्य त्रिशब्दस्य चाभेदान्वये त्रिशब्दस्य मुनिशब्दसापेक्षत्वेन इतरपदार्थान्वितस्वार्थबोधकत्वं त्रिशब्दस्य वर्तते। तदेव सापेक्षस्य लक्षणम्। अतस्सापेक्षमसमर्थवदिति नियमेन तस्मात् त्रिशब्दात् तयबेवाऽसम्भवश्चेत्तस्यापि स्थानेऽयच्प्रत्ययस्तु पुष्पमिव भाति। तथापि त्रयोऽवयवा अस्य समुदायस्येति विग्रहेण त्रिशब्दार्थस्य समुदायाऽर्थे स्वघटितत्वसम्बन्धेन पूर्वमन्वयेन तयपं कृत्वा तस्याऽयचि करणेन त्रयमिति प्रथमं व्युत्पाद्यम्। अत्र त्रिशब्दस्य मुनिशब्दमनपेक्ष्यैव समुदायेऽन्वयात् नास्ति असामर्थ्यम्। अत एव बालमनोरमाकारोऽपि- त्रयोऽवयवा अस्य समुदायस्य इति त्रयमिति प्रथमं व्युत्पाद्यमिति लिलेख [15] । तदनन्तरमेव मुनिनां त्रयमिति मुनिशब्द: समुदाये स्वावयवारब्धत्वसम्वन्धेन अन्वेति। अवयवभूतास्त्रयो मुनयश्च पाणिनिकात्यायनपतञ्जलय:। समुदायस्य प्रत्ययार्थतया प्रधानत्वात्तत्रैवावयवस्य पूर्वमन्वय:, न तु मुनिशब्दस्य त्रयशब्दैकदेशभूतत्रिशब्दार्थेन अभेदान्वय: "पदार्थ: पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति न्यायात्। सोऽयं पार्ष्ठिकान्वय इत्युच्यते। अथवा स्वनिरूपकांशे नित्यसाकाङ्क्षशब्दस्य पदार्थैकदेशेऽपि अन्वयो यथा देवदत्तस्य गुरूकुलमित्यत्र प्रमाणिकस्तथाऽत्रापि मदीयं परिच्छेद्यं किमिति जिज्ञासायां त्रित्वमपि मुनिपदार्थे स्वनिष्ठत्वसम्बन्धेनान्वेति। मुनिनिष्ठं यत्स्त्रित्वं तदवच्छिन्नघटितसमुदायो मुनित्रयपदार्थ:।

प्रकृतसन्दर्भे क्रियाकारकबोधकानि पदानि-

अत्र त्रीणि क्रियाबोधकानि पदानि सन्ति। नमस्कृत्य, परिभाव्य, विरच्यते इति। तेषां मध्ये परिभाव्यार्थक्रियानिरूपितं कर्म तदुक्तीरिति, व्युपसर्गपूर्वकरच्धात्वर्थक्रियाया: कर्म वैयाकरणसिद्धान्तकौमुदीति। नमस्कृत्येति पदेनोपस्थापितव्यापारनिरूपितञ्च कर्म मुनित्रयमिति ज्ञेयम्। अस्मिन् श्लोके कर्तृवाचकं पदं न श्रूयते,कर्त्रा विना च क्रियाया असम्भवादनुपपत्तिप्रमाणेन स क:? इति आक्षेपस्तु स्वाभाविक एव। तथापि सिद्धान्तकौमुद्या एवोत्तरकृदन्तप्रकरणान्ते-

भट्टाजिदीक्षितकृता सैषा सिद्धान्तकौमुदी
प्रीत्यै भूयाद् भगवतोर्भवानीविश्वनाथयो: ।।

इत्यत्र ग्रन्थप्रणेतुर्नामोल्लेनोपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावादिति तमेवाऽविहाय "मया भट्टोजिदीक्षितेन" इति योजयित्वाऽन्वेष्टव्य:। यद्यपि व्यवहारे करबद्धशिरसंयोगानुकूलो व्यापार एव नमस्कारपदग्राह्यो सर्वैरनुभूयते नास्त्यत्र कस्यचिद्विवादस्तथाप्यत्र तत्स्वीकृते उक्तव्यापारस्य, तज्जन्यकरबद्धशिरस्संयोगरूपफलस्य च दीक्षिते एव विद्यमानत्वेन स्वार्थफलसमानाधिकरणव्यापारबोधकत्वकत्वेति नमस्कृ इति धातौ व्यपदेशेन तस्याऽकर्मकत्वात् कर्माऽविषय एवात्र पर्यवस्यति। तथापि त. द्दोषपरिहारायाऽत्र तोषयित्वा इति पदं संयोजनीयमिति बालमनोरमाकारवचनप्रामाणेन [16] करबद्धशिरसंयोगजन्यतुष्ट्यनुकूलो व्यापारस्तत्राङ्गीकारात् सकर्मकत्वेन उक्ततुष्टिफलाश्रयं मुनित्रयं कर्मेति, तदनुकूलव्यापाराश्रयो दीक्षितश्च कर्तेति सुकरास्तत्र सर्वव्यवस्था:।

द्वितीयोपपादनप्रक्रिया-

मुनित्रयं नमस्कृत्य इति वाक्ये मुनित्रयमित्यस्य करबद्धशिरस्संयोगजन्यतुष्टिफलाश्रयत्वेन कर्तुरीप्सिततमं कर्म [17] इति सूत्रेण कर्मसंज्ञायां कर्मणि द्वितीया [18] इति सूत्रेण द्वितीयाविभक्तिर्भवति।अत्रेयं शङ्का जरीजागर्ति, नमस्कृत्येति पदमत्र कृदन्तं तथा च तस्या द्वितीयाया अपि कृदन्तयोगे कर्तृकर्मणो: कृति [19] इति विशेषसूत्रेण बाधात्तत्र षष्ठीति विभक्ति: कथं नेति चेत्तत्राप्युच्यते-अत्र नमस्कृत्येत्यत्र ऊर्यादिच्विडाश्च [20] इति सूत्रेण नमस् इत्यस्य गतिसंज्ञा तत: कुगतिप्रादय: [21] इत्यनेन कृत्वा इत्यनेन सह समासे समासेऽनञ्पूर्वो क्त्वो ल्यप् [22] इति तस्य ल्यपि क्त्वातोसुन्क्वसुन: [23] इत्यनेन क्त्वान्ते कृतस्याऽव्ययत्वस्य ल्यबन्ते आरोपेण नमस्कृत्येति कृदन्ताऽव्यययोगात् न लोकाव्ययनिष्ठालर्थतृनाम् [24] इति सूत्रेण कर्मणि षष्ठीनिषेधात् द्वितीयाया: प्राप्तिर्निर्बाधैवेति चेत्तथापि नम: शब्दयोगेनात्र

नमस्वस्तिस्वधालंवषड्योगाच्च [25] इति सूत्रेण द्वितीयां प्रबाध्य तस्मादेव मुनित्रयप्रातिपदिकात् चतुर्थी कथं नेति चेद्यप्यत्र फलाश्रयत्वात् कर्मसंज्ञानिमित्तिका चतुर्थी चेति एकत्र लक्ष्ये युगपत्प्राप्ता। अतः किं विधेयं न्याय्यमत्रेति जिज्ञासायां कारकाणां क्रियायामेवाऽन्वयः, इति निर्विवादत्वात् क्रियायाः प्राधान्येन तन्निमित्तिककारकविभक्तेः पदसम्बन्धनिमित्तकविभक्तितोऽधिकबलवत्वेन सैवेति पूर्वं ग्राह्येति फलितार्थपरया"उपपदविभक्तेः कारकविभक्तिर्बलीयसी" [26] इति परिभाषया द्वितीयायां मुनित्रयमिति निष्पन्नमित्युत्तरम्। तथापि चतुर्थीप्राप्तेरत्र संभावनापि कथमिति प्रश्नः पुनः समुदेति। तथा हि नमस्वस्तिस्वाहास्वधेति सूत्रे तत्तत्पदमुच्चार्य चतुर्थीति विधानात् विशिष्टरूपोपपादानं सर्वैरनुभूतमेव। यत्र विशिष्टरूपोपपादनमस्ति, तत्र अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति परिभाषाया उपस्थितत्वात् अर्थवति नमश्शब्दयोगे एव चतुर्थी भवतीत्यर्थस्सम्पद्यते। नमस्कृत्येति पदमत्र समस्तम्। समस्ते हि पदे "समुदायो हि अर्थवान् तदवयवो निरर्थकः"इति सिद्धान्तेन नमःशब्दो हि निरर्थक एव। अतः चतुर्थ्याः अत्र नैव सम्भावना, अपरञ्च क्वचिद् स्वीकृतेऽपि अवयवाऽर्थे समासे खलु भिन्नैव शक्तिपङ्कजशब्दवदिति [27] भूषणकारिकाप्रमाणेन च विलक्षणसमूहार्थाऽन्तर्गतः कियान् कश्चार्थोऽवयवस्येति तथा वक्तुं न पारयेद्यथा द्वाभ्यां मिलित्वा जवेन गर्ते प्रवेशितस्य दण्डस्य केन कियान् भागः प्रवेशित इति। यदि चोच्येत- पूर्वोक्तः समुदायो ह्यर्थवान् इति नियमो जहत्स्वार्थायां वृत्तौ भवति। समासे तु अजहत्स्वार्था वृत्तिरपि तु प्रामाणिकोऽस्ति। तत्पक्षेऽवयवानां पृथक् पृथगर्थाङ्गीकारात् सार्थकनमश्शब्दयोगेन चतुर्थी सुलभैवेति चेत्तथाप्यत्र कुगतिप्रादयः [28] इति सूत्रेण तत्पुरूषसमासोऽस्ति। उत्तरपदार्थप्रधानो तत्पुरूषसमासो भवति। अतोऽत्रापि पदजन्यप्रतीतिविशेष्यताश्रयत्वात् कृत्यार्थस्यैव प्राधान्यमस्ति। नमसर्थस्य तु तत्रैव विशेषणत्वात् पदार्थैकदेशत्वम्। नियमस्तु पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति [29]। एवञ्च नमःिति योगेऽप्यप्राप्तायाश्चतुर्थ्याः द्वितीयया सह विरोधोऽपि कथमिति चेत् स्वनिरूपकांशे नित्यसाकाकाङ्क्षार्थस्य एकदेशेऽप्यन्वयः प्रामाणिक एव। नमस्कारो यत्र विधीयते तत्र मदीयं नमस्यं किमिति जिज्ञासा सर्वदैव भाति। येन पदार्थैकदेशस्यापि नमसर्थस्य मुनित्रयेति नमस्येन सहान्वयात् चतुर्थी पुनरपि प्राप्नोतीति चेद्यथा सिद्धान्ते उपसर्गा द्योतका भवन्ति। अनुभवति,अनुगच्छतीत्यादौ धातोरेवानुभवार्थः अनुगमनार्थः, अनूपसर्गस्तूभयत्र द्योतकः, स्वसमभिव्याहृतपदनिष्ठवृत्युद्बोधकत्वात्। अत्रापि गतिसंज्ञकोऽयं नमः शब्दः कृधात्वर्थस्यैव द्योतकः, न तु स्वतन्त्रतया वाचकः। अतस्स्वार्थस्याभावादत्रापि नमः पदयोगे चतुर्थ्याः प्राप्तिर्नास्त्येवेति चेद्यत्र द्योतकवाचकपदयोस्समभिव्याहारस्तत्रत्या विषयतोभयप्रयोज्यैवाङ्गीक्रियते। तस्मात्तत्र कृधात्वर्थस्यैव नमसर्थत्वमपि स्वीकारात् सार्थकनमस्पदयोगेन चतुर्थी प्राप्तैवेति तन्निवार्य द्वितीयासम्पादनार्थं "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति परिभाषाऽत्र समुचितैव। यत्र क्रियाकारकसम्बन्धमूलिकायाः विभक्तेः प्राप्तिरेव नास्ति तत्रैव हरये नमः, अनेन सूत्रेण चतुर्थी ज्ञेया। नमश्शब्दयोगेऽपि यत्र नमस्ये नमस्योद्देश्यता न प्रतीयते तत्रापि चतुर्थी न भवति। तेन हरये काश्यां नमः इत्यत्र काशीशब्दात् न चतुर्थी, अत एव स्वयम्भूवे नमस्कृत्य, इत्यत्र स्वयम्भुवमनुकूलयितुमित्यर्थविवक्षायां क्रियार्थोपपदस्य कर्मणि स्थानिनः, इति सूत्रेण चतुर्थीति तत्वबोधिनीकारस्य वचनं सङ्गच्छते। [30] एतादृशी चेदवस्था तर्हि नमस्वस्तिस्वाहास्वधेति सूत्रमेवान्यथासिद्धमिति तु नाशङ्कनीयम्, हरये नमः इत्यत्र हरिमनुकूलयितुमित्यर्थेऽविवक्षिते सम्बन्धसामान्ये षष्ठ्यां प्राप्तायां तदपवादतया तस्यावश्यकत्वात्।

तदुक्तीः परिभाव्य च -

तदुक्तीः परिभाव्य चेत्यत्र तच्छब्दः सर्वनामसंज्ञको वर्तते। सर्वनामशब्दो यथा प्रधानपरामर्शी भवति, तथैव बुद्धिस्थत्वोपलक्षिततत्तद्धर्मावच्छिन्ने शक्तोऽपि भवतीति शेखरग्रन्थप्रमाणम् [31]। तत एवाऽत्र यदि तच्छब्देन मुनित्रयसमुदायो गृह्यते, तदा दोषस्तदवस्थैव, यतो हि त्रिमुनिसमुदायकर्तृकोक्तोरेकत्राऽसम्भवात्। यथा महाभाष्यं पतञ्जलिरेकाकी लिले।अष्टाध्यायी पाणिनिरेकाकी विरचयामास। सूत्रे उक्तानुक्तदुरूक्तकार्थवाक्यविशेषो वार्तिकं भवति। तच्च कात्यायन न कस्यचित् साहाय्यमनपेक्ष्य प्रणिनाय। किन्तु स्वयं केवलमेव सूत्रग्रन्थं विचिन्त्य सम्पादितवान्। तेनैव प्रणीतानि सर्वाण्यपि वार्तिकानि, न तु त्रिभिर्मिलित्वा। इत्थं त्रिमुनिसमुदायकर्तृकोक्तिः कुत्रचिदपि अभावात् तदुक्तीरिति शब्दार्थस्य स्वारस्यं भज्येत। अत एव समुदायमपहाय पृथक् पृथक् त्रिमुन्यवयवकर्तृका उक्तय एवाऽत्र गृह्यन्ते। तथा च काशिकाकाराणां प्राचीनवैयाकरणानां त्रिमुनिविरोधोक्तीः तिरस्कृत्य, पाणिनिकात्यायनपतञ्जलीनां सम्मतोक्तीः सम्यग् विचार्य चेति तदुक्तीः परिभाव्य च इति पङ्क्तेरभिप्रायः। तथा च मुनित्रयोक्तिविचारपूर्वकत्वादस्य ग्रन्थस्य प्रामाणिकत्वं ध्वनितम्। न च परिपूर्वकभूधातो तिरस्कारार्थतया विचार्य इत्यर्थोऽप्रामाणिकः, तथापि परौ भुवोऽवज्ञान [32] इति सूत्रे अवज्ञाने इतिग्रहणेन धातूनामनेकार्थत्वज्ञापनेन विचारार्थकत्वाऽक्षतेः। अत्रापि सन्देहो जागर्ति एकेनैव परिभाव्येति पदेन तिरस्कृत्य एवं सम्यग्विचार्य चेति अर्थद्वयं सकृदुच्चारणेन कथं सम्भवः? यद्यपि सकृदुच्चरितः शब्दः सकृदेवाऽर्थं गमयति क्वचिद्रीतिस्तथापि धातूनामनेकार्थैत्वात् सकृदुच्चारितेऽपि धातौ एकशेषं स्वीकृत्य यः शिष्यते स लुप्यमानार्थाभिधायी इति नियमेन उभयार्थोऽपि सिद्ध्यति।

मया भट्टोजिदीक्षितेन -

अत्र भटपरिभाषणे [33] इति धातुः, उ वितर्केऽव्यये च। भटन्ति सभायामिति भट्टाः, अर्थात् शास्त्रार्थे पण्डिताः, तान् उ=तर्केण जयतीति भट्टोजिः, अत्र जिधातोः "क्विप् च [34] " इति सूत्रेण क्विप्प्रत्ययेऽपि "ह्रस्वस्यपिति कृति तुक् [35] "इति सूत्रेण तुगागमस्तु न भवति। आगमजमनित्यमित्यनेन अनित्यत्वबोधनात्। दीक्षणं दीक्षा= तन्त्रोक्तमभीष्टप्रदमन्त्रग्रहणम्, दीक्षा सञ्जाता अस्येति दीक्षितः। "तदस्य सञ्जातं तारकादिभ्यः [36] " इत्यनेन इतच्प्रत्ययोऽत्र। भट्टोजिश्चासौ दीक्षितः भट्टोजिदीक्षितः तेन भट्टोजिदीक्षितेन। अथवा गुरूपरम्परायामिदमप्यस्ति- अभाटि प्रौढमनोरमासिद्धान्तकौमुद्यादिग्रन्था इति भट्टः,उः=शंकरः, तस्माज्जातः उजः अर्थात् गणेशः। गणेशो मङ्गलफलदातृत्वेनसम्बन्धेन अस्ति अस्मिन्निति उजी। भट्टश्चासौ उजीति भट्टोजी। दीक्षणं दीक्षा, दीक्षा सञ्जाता अस्येति दीक्षितः, भट्टोजी चासौ दीक्षितः=भट्टोजिदीक्षितः। तेन भट्टोजिदीक्षितेन। अस्य शब्दस्य प्रकृतिप्रत्ययविभागविषये लक्ष्मीटीकाकारस्तु वस्तुतस्तु इति समुल्लिख्य भट्टान् उ= तर्केण जिनाती पराजयतीति भट्टोजीः दीर्घान्तमप्येकत्र पक्षे स्वीकृतवान्। तथा हि ज्याधातोः कर्तरि क्विपि ग्रहिज्येति सम्प्रसारणे हलः

इति दीर्घे नागोजीभट्टः इतिवत् दीर्घान्त एव भट्टोजीशब्द [37] इति। दीक्षार्थः कः? इत्यस्मिन् विषये तत्रोक्तोऽयं श्लोकः।

दीयते विमलं ज्ञानं क्षीयते कर्मवासना ।
तेन दीक्षेति सा प्रोक्ता मुनिभिस्तत्वदर्शिभिः।। [38]
वैयाकरणसिद्धान्तकौमुदी-

व्याक्रियन्ते= व्युत्पाद्यन्तेऽसाधुभ्यो विविच्य साधुत्वेन पृथक्क्रियन्ते शब्दा अनेनेति व्याकरणम्, अर्थात् असाधुशब्दावधिक साधुकर्मक पृथक्कृतिप्रयोजकनियमविशेषो व्याकरणम्=शब्दानुशासनशास्त्रम्। व्याकरणमधीयते विदन्ति वेति वैयाकरणाः सिद्ध अन्तो येषान्ते सिद्धान्ताः, वैयाकरणानां सिद्धान्त वैयाकरणसिद्धान्ताः। कौ पृथिव्यां मोदयति हर्षयतीति कुमुदः, तस्येयं कौमुदी वैयाकरणसिद्धान्तानां कौमुदी वैयाकरणसिद्धान्तकौमुदी।

उपसंहारः-
लौकिकवैदिकोभयशब्दव्याख्यानात् विकराले कलिकाले पाणिनीयं व्याकरणं सर्वेभ्यो व्याकरणेभ्य सुगमं परिपूर्णञ्चास्ति। पाणिनीयव्याकरणस्य मूलग्रन्थः अष्टाध्यायी वर्तते। तस्याः द्विधा व्याख्यानं प्रसिद्धम्। सूत्रक्रमेण प्रक्रियाक्रमेण च। प्रक्रियानुसारेण व्याख्याने व्याख्यातृषु वैशिष्ट्यं स्थानं भट्टोजिदीक्षितस्य वर्तते। यतोहि प्रक्रियामाध्यमेन शब्दसाधुत्वप्रतिपादनपरेषु सर्वेषु ग्रन्थेषु सिद्धान्तकौमुदीग्रन्थस्य वैलक्षण्यं पाणिनीयव्याकरणे दृश्यते। तत्र कौमुद्यां त्रिविधेषु मंगलेषु नमस्कारात्मकं मंगलं तेनाभिहितम्। वाक्यार्थज्ञाने वाक्यघटकानि यावन्ति पदानि तेषामर्थज्ञानं च प्रथममावश्यकमिति अनुमितिसिद्धप्रमाणेन ग्रन्थानुसारेण च यथामति मया पदशः व्याख्या समालोचिता इति।

**संदर्भ सूची**


1. त्रिपाठी, ब्रह्मानन्द, व्या.शास्त्रस्येतिहासः, पृ. सं. 50, वाराणसी, चौ. सु. भा. प्र. 2009 ई.।
2. भट्टोजिदीक्षितः, वै.सि.कौ. ,मोतीलाल बनारसीदास,1965 ई.।
3. पतञ्जलि व्या. महाभाष्यम्, प्र.खण्डः, सप्रदीपोद्योतम्, भाष्ये पृ. सं. 110.
4. श्रीमद्भगवद्गीता, 3/2 गोरखपुर, गीताप्रेस।
5. नागेशभट्टः, लघुशब्देन्दुशेखरः, नित्यानन्दकृतदीपकोपेतः, पृ.2, अष्टमसंस्करणम्, चौ.सं.सं. ,2049 वि.सं।
6. शर्मा सभापतिः, सि. कौ. लक्ष्मीव्याख्याख्याख पृ.1 ,संपा. पञ्चोली शर्मा बालाकृष्णः, मोतीलाल बनारसीदास,1965 ई.
7. भट्टाचार्यः विश्वनाथः, न्या.सि.मु. सकिरणावली, पृ.सं. 8तः 14, चतुर्थसंस्करणम्, चौ.सं.सं. वाराणसी, 2047 वि.सं.
8. पूर्ववत्,न्यायसिद्धान्तमुक्तावली, मंगलाचरणम्, पृ.सं.1.
9. कालिदासः, कु.सं. हि. व्याख्याता प्रद्युम्नपाण्डेयः, सं.6, चौ.वि.भ. वाराणसी,1994ई.
10. उणादिसूत्रम्, (4/123)
11. बृहदारण्यकोपनिषद्, अ.4, ब्रा 22, पु.मु. 2037 वि.सं., प्र. गोविन्दभवनकार्यालय, गीताप्रेस।
12. पाणिनिसूत्रम्, 5/2/42.
13. पाणिनिसूत्रम्, 5/2/43
14. पाणिनिसूत्रम्, 2/2/1
15. वै.सि.कौ. ,द्वितीयखण्डः, पृ.2.
16. वै.सि.कौ. प्र.ख.बालमनोरमायाम्, पृ.2
17. वै.सि.कौ.प्र.ख., बालमनोरमायाम्, पृ.सं.3
18. पा.सू.1/4/49
19. पा.सू.2/3/2
20. पा.सू.2/3/65
21. पा.सू.1/4/61
22. पा.सू.2/2/18
23. पा.सू.7/1/37
24. पा.सू.1/1/40
25. पा.सू.2/3/69
26. पा.सू.2/3/16
27. विश्वनाथमिश्रः, परिभाषेन्दुशेखरः प.सं.103, सुबोधिनीहिन्दीव्याख्योपेतः तृ.सं., चौ.सु.भा., 1997. ई.
28. कौण्डभट्टः, वै.क.भू.सा.सदर्पणः पृ.सं.348,व्याख्याकारः ब्रह्मदत्तद्विवेदी, प्र.सं.,चौ.ओ.1985 ई.।
29. पूर्ववत्
30. भट्टगदाधरः, व्युत्पत्तिवादःसजया,पृ.सं. 21,व्याख्याकारः जयदेवमिश्रः, पु.मु. वाणीविलासप्रकाशन वाराणसी, 1988 ई.
31. पूर्ववत्, वै.सि.कौ पृ.सं.2.
32. पूर्ववत्,लघुशब्देन्दुशेखरः, पृ.सं.418,
33. पा. सू. 3/3/55
34. भट्टोजिदीक्षितः, वै.सि.कौ. सबालमनोरमातत्वबोधिनी, पृ.सं.181, धातुसं.780,
35. पा.सू.3/2/76
36. पा. सू.6/1/71
37. पा.सू.5/2/36
38. पूर्ववत् सिद्धान्तकौमुद्याः लक्ष्मीटीकायां पृ.सं.7
39. पूर्ववत् सिद्धान्तकौमुद्याः लक्ष्मीटीकायां पृ.सं.40